## पूर्वोऽभ्यासः । (४/२१७८)

द्वे इति प्रथमान्तं [1]यदनुवर्तते तदर्थादिह षष्ठ्यन्तं जायते । तत्र प्रत्यासत्तेरस्मिन् प्रकरणे ये द्वे विहिते तयोर्यः पूर्वोऽवयवः सोऽभ्याससञ्ज्ञो भवति । पपाच । पिपक्षति । पापच्यते । जुहोति । [2]अपीपचत् । अभ्यासप्रदेशास्तु 'अत्र लोपोऽभ्यासस्य' (७.४.५८/२६२०) इत्येवमादयः ॥

## उभे अभ्यस्तम् । (५/४२६)

द्वे इति [3]वर्तमाने उभेग्रहणं समुदायसञ्ज्ञाप्रतिपत्त्यर्थम् । ये द्वे विहिते ते उभे अपि समुदिते [4]अभ्यस्तसञ्ज्ञे भवतः । ददति । ददत् । दधतु[5] । उभेग्रहणं किम् ? नेनिजति इत्यत्र अभ्यस्तानामादिः इति [6]समुदाये उदात्तत्वं यथा स्यात्, प्रत्येकं पर्यायेण वा मा भूत् इति । अभ्यस्तप्रदेशाः[7] – 'अभ्यस्तानामादिः' (६. १. १८९/३६७३) इत्येवमादयः ॥

## जक्षित्यादयः षट् । (६/४२८)

अभ्यस्तम् इति वर्तते । जक्ष इत्ययं धातुः इत्यादयश्चान्ये षट् धातवः [8]अभ्यस्तसञ्ज्ञा भवन्ति । सेयं सप्तानां धातूनाम् अभ्यस्तसञ्ज्ञा [9]विधीयते । 'जक्ष भक्षहसनयोः' (धा.पा. १०७२) इत्यतः प्रभृति 'वेवीङ् वेतिना तुल्ये' (धा.पा. १०७८) इति यावत् । जक्षति । जाग्रति । दरिद्रति । चकासति । शासति । दीध्यते, वेव्यते इत्यत्र 'अभ्यस्तानामादिः' इत्येष[10] स्वरः प्रयोजनम् । [11]दीध्यत् इति च शतरि व्यत्ययेन सम्पादिते 'नाभ्यस्ताच्छतुः' (७.१.७८/४२७) इति नुमः प्रतिषेधः[12] ॥

## तुजादीनां दीर्घोऽभ्यासस्य । (७/३६००)

तुजादीनाम् इति प्रकारे आदिशब्दः । [13]कश्च प्रकारः ? तुजेर्दीर्घोऽभ्यासस्य न विहितः, दृश्यते च । ये तथाभूताः ते तुजादयः, तेषामभ्यासस्य दीर्घः साधुर्भवति । 'तूतुजानः' (ऋ. १. ३. ६) । 'मामहानः' (तै.सं. ४.६.३.२) । 'अनड्वान् दाधार' (अ.वे. ४.११.१) । 'व्रतं मीमाय' (अ.वे. ५. ११. ३) । दाधार । 'स तूताव' (ऋ. १.९४.२) दीर्घश्चैषां छन्दसि प्रत्ययविशेषे [14]एव दृश्यते, ततोऽन्यत्र न भवति । तुतोज शबलान् हरीन्[15] ॥

## लिटि धातोरनभ्यासस्य । (८/२१७७)

लिटि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । पपाच । पपाठ । प्रोर्णुनाव । वाच्य ऊर्णोर्णुवद्भावः[16] इति वचनाद् ऊर्णोतेः [17]इजादेः (३.३.३९/२३३७) इति आम् न भवति ।

---

1. पदम् फ.ह. 2. अपीठत् ब. 3. अनुवर्तमाने क. 4. अभ्यस्तसञ्ज्ञके क. 5. दधति अदधत् इत्यधिकम् क. 6. समुदायपरस्य फ, उदात्तत्वे समुदाये क. 7. अस्मिन् प्रकरणे इत्यधिकम् क.ग.फ. 8. अभ्यस्तञ्ज्ञकाः क. 9. विधीयते नास्ति क. 10. एष नास्ति क. 11. दीध्यतः ह. 12. प्रयोजनम् इत्यधिकम् ह. 13. च नास्ति क. 14. च क. 15. इति इत्यधिकम् क. ड. 16. यङः प्रसिद्धिः प्रयोजनम् । आमश्च प्रतिषेधार्थम् इत्यधिकम् फ. 17. इजादेश्च गुरुमतोऽनृच्छः ब.